M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. ______

Ser. 180

Title: Andgataitva hayoga

180

Audgātritva Prayoga	Title
	Author
	Editor
Saka 1749	Year, Vols.
	Publisher
180	Remarks

अथ औद्गात्रप्रयोगप्रारंभः॥ श्रीः

॥उद्गा॰प्र॰॥
॥१॥

श्रीगणेशायनमः॥ ॥अथोद्गातःप्रयोगे॥ ॥ऋत्विगार्षेयोअनूचानइत्याद्युक्तल
क्षणवान्त्विग्भवति॥ यज्ञशर्माज्योतिष्टोमेनाग्निष्टोमेनरथंतरपृष्ठेनद्वादशशतंगवद
क्षिणेनसोमेनयक्ष्यते तत्रऔद्गात्रंभवताकर्तव्यमितिसोमप्रवाकेनप्रार्थितः॥ज्योतिष्टोमे
नाग्निष्टोमेनरथंतरपृष्ठेनद्वादशशतदक्षिणेनाहंयक्ष्ये॥तत्रमेत्वमुद्गाताभवेतियजमाने
नप्रार्थितः॥उद्गातायद्यार्त्विज्यंनकरिष्यंस्त्यात्तदानमःसोमायराज्ञइत्युक्त्वाप्रत्याख्यानं
कुर्यात्॥ नकरिष्यामीतियद्यार्त्विज्यंचिकीर्षतितदासोमप्रवाकंयजमानंवाप्रतिमंत्रयेत्
अभिमंत्रयेदितिधन्विभाष्यं॥महन्मेवोचोभर्गोमेवोचोयशोमेवोचः स्तोमंमेवोचोभुक्तिंमे
वोचःसर्वंमेवोचस्तन्माभवतुतन्माविशतुतेनभुक्षिषीयेतियद्यार्त्विज्यंकरिष्यामिइत्ति
निश्चिनोतिसोमप्रवाकेणसोमप्रवचनेअनुक्तेपिमहन्मेवोचइतिमंत्रंब्रूयात्॥यत्रावसथे
सोमप्रवाकोवसतितंप्रतितस्मैलवणमिश्रमन्नमुद्गाताप्रयच्छेत्॥अथोद्गातर्यागतेयज ॥१॥
मानःप्रर्जन्योमउद्गातेतितस्यदेववरणं॥यज्ञशर्मामानुषइतिमानुषवरणंचकुर्यात्॥अ

थोद्गातुर्मधुपर्कप्रतिग्रहप्रकारः यजमानपरिचारकाविष्टरंपाद्यमर्घ्यमाचमनीयंमधुपर्कंगांचा
हरतिउद्गाताविष्टरादिभिसर्वाण्यवेक्षते॥गामवप्रेक्षेतेतिकेचित्॥अर्हणापुत्रवाससाधेनुरभ
वद्यमे॥सानःपयस्वतीदुहाउत्तरामुत्तरांसमां॥इतितिष्ठंजपति॥इदमहमिमांपद्यांविराज
मन्नाद्यायाधितिष्ठामिइतियजमानेनविष्टरावितित्रिरुक्तेतौप्रतिगृह्यतयोरेकस्मिन्नासीनया
ओषधीःसोमराज्ञीर्बह्वीःशतविचक्षणाः॥तामह्यमस्मिन्नासनेछिद्राःशर्मयच्छतेतिपा
द्यमितित्रिरुक्तेनत्पात्रजलमवेक्षते॥यतोदेवीःप्रतिपश्याम्यापस्ततोमाराद्धिरागच्छत्विति
अथसव्यपादे तस्यैकदेशंनिनयेत्॥ सव्यंपादमवनेनिजेअस्मिन्राष्ट्रेश्रियमदधेइतिपुनरेक
देशंदक्षिणपादेनिनयेत्॥ दक्षिणंपादमवनेनिजेअस्मिन्राष्ट्रेश्रियमावेशयामीतिअवशिष्टंज
लमुभयोःपादयोर्निनयेत्॥पूर्वमन्यमपरमन्यमुभौपादाववनेनिजे॥राष्ट्रस्यर्ध्याअभय
स्यावरुध्याइतिपादद्वयमितरस्मिन्विष्टरेदध्यात्॥याओषधीःसोमराज्ञीर्विष्ठिताःपृथिवी
मनु॥तामह्यमस्मिन्पादयोरछिद्राःशर्मयच्छतेति॥अर्घ्यमितित्रिरुक्तेनत्प्रतिगृह्णीयात्॥
अन्नस्यराष्ट्रीरसिराष्ट्रिस्तेभूयासमितितदर्घ्यंशिरस्यवनयति॥अथोद्गात्रेवस्त्रादी

निदधाति॥ आचमनीयमिति त्रिरुक्ते तत्प्रतिगृह्णीयात्॥ यशोसि यशो मयि धेहि। तेनाच
मनं कुर्यात्॥ मधुपर्क इति त्रिरुक्ते तत्प्रतिगृह्णीयात्॥ यशसो यशोसीति तस्यैकदेशं हस्ते
निधाय पिबेत्॥ इदमन्नमयं रसइमा गावः सहश्रिया॥ तत्सवितुर्वरेण्यं वाग्वङ्कुवेवङ्कुमेभू
यात्स्वाहेति हस्तं प्रक्षाल्य पुनरेकदेशं निधाय पिबेत्॥ इदमन०॥ भर्गो देवस्य धीमहि प्राणो
वैवा चाभ्भूया बङ्कुमेभूयो भूयात्स्वाहेति पुनश्च हस्तं प्रक्षाल्य एकदेशं निधाय पिबेत्॥ इदमन०
धियो यो नः प्रचोदयात् मनो वा वमवें सर्वमे भूयात्स्वाहेति यशसो भक्षोसि महसो भक्षोसि
श्रीभक्षोसि श्रियं मयि धेहि॥ त्रिस्तूष्णीं चतुर्थं॥ इति प्रस्तोतृप्रतिहर्तृसुब्रह्मण्यानां भक्षण
मंत्रः॥ पुनः हस्तं प्रक्षाल्य तूष्णीं पिबति॥ चतुर्थं तूष्णीमिति न भवतीति अग्निस्वामिभा
ष्यं॥ पुनश्चाचमनीयेनाचम्य शेषं ब्राह्मणाय दद्यात्॥ लौकिकाचमनं ब्राह्मणाभावे अ
द्भिः संप्रोक्ष्य अब्राह्मणाय दद्यात्॥ अथ गौरिति त्रिरुक्ते मांसभक्षणेच्छा चेत्कुरुतेति ब्रूया
त्॥ यदि गां विमोक्तुमिच्छा भवति तदेवं ब्रूयात्॥ ओं हतो धर्मस्तृणान्यत्तु पिबतूदकमुत्सृ २
जतेति उत्सृजत गां तृणानि गोरत्तु॥ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाम्

मृतस्य नाभिः॥ प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट॥ केचित्तु अत्र गृह्योक्तोम
धुपर्कप्रकारो नारायणीयः॥ सूत्रप्रकारेण कल्पंगतयात्रपृथग्विधानादिति मन्यंते॥ अथ यजमा
नस्य देवयजनयाचनाभावपक्षे उक्तात् मधुपर्कप्रयोगानंतरं आत्मनो देवयजनगमनकालात्प्रा
त्ततत्कर्मानुष्ठानार्थं प्रस्तोतृसुब्रह्मण्यौ प्रेषयेत्॥ सर्वेषामार्त्विजोपक्रमवेलायां यज्ञोपवीतमाच
मनं च कर्तव्यं॥ कर्मानुष्ठानकाले यज्ञांगानामव्यवाय अभिमुखं च प्राङ्मुखैश्च कर्तव्यमनादेशे
॥दीक्षणीये॥ अथ प्रस्तोता पूर्वमवृतश्चेद्दीक्षणीं वृतः सन्पूर्वया द्वारा शालां प्रविश्योत्तरेणाग्नी
नात्वा गार्हपत्यस्य पश्चात्प्राङ्मुख उपविष्टस्तिष्ठन्वा प्रधानयागकाले त्यमूष्विति तार्क्ष्यसामनीमध्य
मस्वरेण प्रत्येकं त्रिस्त्रिर्गायेत्॥ सर्वत्रानादेशे परिसामानि प्रस्तोता गायेत्। स्वाध्यायवत्स्वासुत्त
चापत्तीनित्त्वेषु त्रिरितराणि इति सूत्रे तच्चोक्तं नानां परिसाम्नां त्वेस सकृज्ज्ञानं विहितं। इतरेषां
साम्नां त्रिः। गानं च परिसामानि प्रस्तोतैव गायेदनादेशे॥ आद्यं तदर्शनस्तोभो विधा गीतेषु साम
सु॥ पादे पादे न संहार्यः सोपायो निधने भवेत्॥ नग्नानि ह वा भवंति परिसामानि तस्मादाद्यंत

नादेशो॥ तदाप्नाननामतीर्थं॥ उत्तरमंत्रस्यादिग्रहणे पूर्वसंत्रस्यावसानं वेदितव्यं॥ सुब्रह्मण्यप्रैष
नेतरं पूर्वमहृतश्चेदिदानीं हृतः सन् सुब्रह्मण्यः सोमवहनमुत्तरेण गत्वा उत्तराभीषामक्रम्यर्ईप
सपालाशां पलाशशाखां शमीशाखां वा दक्षिणहस्तेन धारयेत्॥ अक्षस्य पश्चादुभावेव तिष्ठेते॥
यजमानेन सुब्रह्मण्याह्वाने हृते सुब्रह्मण्यः प्राचीवर्तमाने शकटे वामहस्तेन रज्जुं हृयं गृही
त्वा दक्षिणोपक्रमेणानडुहो पलाशशाखया प्रेरयेत्॥ प्राङ्मुखो व्रजन् सुब्रह्मण्यामिति त्रिरा
ह्वयति प्रत्यङ्मुखे शकटे षट्कृत्व आह्वयेत्॥ उभयत्र मध्यमस्वरेण। नात्र निगदः। सासिसुब्र
ह्मण्ये यति यजमानवाचनं केचिदिच्छंति॥ यजमानान्वारंभोपहवो न स्तः॥ सुब्रह्मण्य अन
स्थ्छदिषि शाखामवगूह्य पश्चिमामीषामनिक्रम्याहवनीयस्थापितस्य सोमस्य व्यवाय
मकुर्वन्नाछेत्॥ अध्वर्युणा अनडुत्प्रदाने प्रतिगृह्णीयात्॥ मंत्रेणेति केचित्॥ आतिथ्यायां ५
प्रस्तोता प्रधानयागकाले पूर्ववच्छालां प्रविश्य गार्हपत्यस्य पश्चादुपविश्य गायत्रेणाशनेसाम

प्रेष्ठं व इति त्वचं गायेत्॥ अस्य साम्न उशान ऋषिः। गायत्री छंदः। अग्निर्देवता। प्रेष्ठंवोः। अता २३ यिथीम्।
स्तौषेमित्रम्। इवशा २३ यामू। अग्नायिरा ३ था ३ म्। नावा २३ हो ३४३ यि। दा २३४ यो ६ हायि॥ कविमि
वा। प्रशं२ सा २३ यामू। यं देवास ः इति द्वा २३ यिता। निमार्ता ३ ये ३ षुवा २३ हो ३४३ यि। दा २३४ धोर
हायि। तुर्वजवाइ। छंदोश्च २३ षाः। न्नृं २ः पाहिस्ह। एहीगा २३ यिरा ः रक्षातो ३ का ३ मू। ऊता २३
हो ३४३ यि। त्वा [illegible] २३४ नो ६ हायि। अथ तान्नूनज्ञामिमर्शनात् पूर्वं यजमानः प्रतिहर्तारं वृणइति
वृणीते पूर्वमवृतश्चेत्। उद्गातारस्तान्नूनत्रमभिमृशंति। हविरसि वैश्वानरमनाधृष्टमनाधृ
ष्यं देवानामोजोनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यमंजसा सत्यमुपगेषं २ स्वविते माधा इ
ति॥ उद्गातारो अं२ शुरं २शुष्टे देव सोमाप्यायतामिंद्रायेकधनविद आ तुभ्यमिंद्रः प्यायतामा
त्वमिंद्राय प्यायस्वाप्यायय यास्मान्त्सखीन्त्सन्या मेधया स्वस्ति ते देव सोम सुत्यामुदृचमशीये
तिराजानमाप्याययंति॥ महंती रूपस्पृश्य पुनरुपस्पृश्य यथायतनमुपविशंति। उद्गात्

प्रमुखाः प्रस्तरस्योपरि दक्षिणान्पाणीनुत्तानान्कृत्वा सव्यान्नीचः कृत्वा निह्नवीरन्॥ पृष्टाराय
पृष्टावामानिप्रेषेभगायर्तं मत्तवादित्योनमोदिवेनमः पृथिव्याइतिनिह्नवनंनाम द्यावापृथि
व्योर्नमस्कारः॥ अवांतरदीक्षाग्रहणकालेसुब्रह्मण्याह्वानंकुर्यात्॥ ब्रह्माचदक्षिणतस्ति
ष्ठेत्॥ सुब्रह्मण्योहं ब्रह्मश्रीः सामत्तंपाच्छंदः॥ आदित्यऋषिः॥ इंद्रोदेवता॥ ब्रह्मचवाइद
मग्रेसुब्रह्मचास्तांइतिविधायकब्राह्मणंसुब्रह्मण्यामित्योकारंप्लावयन्नुच्चैस्त्रिराह्वयेत्॥
मध्यमस्वरेणेतिकेचित्॥ पूर्वयोः प्रणवयोविरम्योत्तमेनवचनेनसहइंद्रागच्छहरिवआ
गच्छमेधातिथेर्मेषवृषणश्वस्यमेने। गौरावस्कंदिन्नहल्यायैजारकौशिकब्राह्मणगौतम
ब्रुवाण॥ अत्राथवस्येत्॥ त्र्यहेसुत्यामागच्छमघवन्देवाब्रह्माण॥ आगच्छतागच्छतागच्छ
त॥ अथयजमानंवाचयेत्॥ सासिसुब्रह्मण्येतस्यास्तेपृथिवीपादः॥ सासिसुब्रह्मण्येत ५
स्यास्तेंतरिक्षंपादः॥ सासिसुब्रह्मण्येतनःस्यास्तेद्यौःपादः॥ सासिसुब्रह्मण्येतस्यास्तेदि

दिशःपादः॥ परोरजास्तेपंचमःपादः॥ सानइषमूर्जंधुक्ष्व॥ वीर्यमन्नाद्यंधेहीति॥ एवंत्रि वारमा
ह्वानंकुर्यात्॥ सुब्रह्मण्यायाःस्वरः। ओंकारउदात्तः। इंद्रागच्छेत्यादिषुवाक्येषुआद्ये द्वे वर्णे उदा
त्ते॥ आख्यातद्वये अकारगकारउदात्तौ॥ त्र्यहेसुत्यामितिपदयोरंतउदात्तः॥ आख्यातस्यपू
र्ववत्मघवन्नितिपदंसर्वानुदात्तं॥ देवाब्राह्मण इतिपदद्वयेआदिवर्णयोरुदात्तत्वं॥ आगच्छतेत्य
त्राप्यादिवर्णानुदात्तौ॥ एतद्विधानाच्छिष्टंसर्वमनुदात्तं॥ यजमानेनसुब्रह्मण्यायपद्मयस्वेत्युक्ते
उपहूतइतिप्रत्याह॥ पत्न्यापिसुब्रह्मण्यापद्मयस्वेत्युक्ते उपहूतेतिप्रतिवचनं॥ एतस्मिन्का
लेसुब्रह्मण्यायनारिकेलाउपहारंघात्॥ प्रस्ताताअध्वर्युणासामानिगायेत्युक्तेपूर्ववत्सुविश्य
गार्हपत्यस्यपश्चादुपविशति॥ यदामहावीरमनक्ति॥ तदाहावांजेतिशार्ङ्गंत्रिर्गायेत्॥ शार्ङ्गस्य
जगतीछंदः कक्षीवान्ऋषिःघर्मोदेवता॥ हावांजा। ता २३४ यि। वियंजंतेसमंजते। एहियाउ ३४ ए
हियाउ ३४ हाउक्रान्त्वस। रा २३४ यि। हंतिमधुवाभियंजते। एहियाउ। एहिया २४ हाउसाइधोः। उ

२३४ त्। श्वासेपतयंतमुस्तण्णंम्। एहियो। एहियो। ३४ हाउहाइरा। ण्या। २३४ पावाः पश्रुमस्कगण्यन्
ते। एहिया। एहियो। ३४ होउ। हो५यिडा। रजतउपधीयमानेनियुत्वान्वायवागहीतिश्रुक्रंसक्रुद्गायेत्
त्। अस्यसाम्नःश्रुक्रऋषिः। गायत्रीछंदः। घर्मोदेवता। हाउ ३श्रुक्रम्। श्रुक्रं२श्रुक्रम्। श्रुक्रं२श्रु
क्रम्। श्रुक्रं२श्रुक्रम्। श्रुक्रं२श्रुक्रम्। नियुत्वान्वाया ३गोवा१हा२अयुं२श्रुक्रोआ३यामा१यि
ता२यि। गंतासिसत्कन्वा३तोग्द९हा२३न्। हाउ। श्रुक्रम्३श्रुक्रं२श्रुक्रम्। श्रुक्रं२श्रुक्रम्। श्रुक्रं२
श्रुक्रम्। श्रुक्रम्। श्रुक्रा। २३४ओहोवा। ए। श्रुक्रम् ३॥६॥ अध्वर्युणामहावीरेपरिधिपरिधाने
क्रियमाणेघर्मतन्वोसक्रुद्गायेत्। एतयोः सप्तऋषयऋषिः। बृहतीछंदः। घर्मोदेवता। हाउ।
प्रसोमदेवा३वायिता१या२३यि। हाउ। ३सिंधुर्नपिप्ये३आर्णा१सा२३हाउ३अं२शोः पयसाम
दिरोना३जागृ१वी२३ः। हाउ। ३। अछाकोशामा। ३मधुश्चू१ता२३हा५३। वा। घर्मः प्रवृक्तस्तन्वा ॥६॥
समानधेवृधेस्कवा२३४५ः॥८॥ ओहो३वा३ई५या३आयिही२।३। प्रसोमदे। ववा२यिता।

२३४ यायि। सिंधुर्नपि। प्येआ२र्णा २३४ सा। अं२शोः पयसामदिरः। नजा२गृ२३४वीः। अछा
कोशाम्। मधु२श्चू२३४ताम्। ओहो३वा३ई५३या। ३आयिही२। आयिही२३आ२यि। हा२३४ओहो
वा। घर्मः प्रवृक्तस्तन्वासामानशेमहेस्कवा२३४५ः॥८॥ स्कवर्णरुक्मउपधीयमानेचंद्रंसक्रुद्गायेत्।
चंद्रऋषिः। प्रजापतिर्देवता। गायत्रीछंदः घर्मोदेवता। हाउ। ३चंद्रम्। ३। चंद्रंचंद्रम्। २। चंद्रंचंद्रम्। चंद्रं
चांद्रम्। २चंद्रंचांद्रं। अत्राहागो। रा३मान्वा१ता२नामत्वष्टुरा३पायिचा१या२म्। इत्थाचंद्रमा३सोगृ१
हा२३यि। हाउ। चंद्रम्। ३। चंद्रंचंद्रम्। चंद्रंचंद्रम्। चंद्रंचांद्रम्। चंद्रंचा२द्रा२३४ओहोवा। ए। चंद्रम्३प्र
स्ताताचंद्रगानानंतरंअन्यान्यपिधर्मलिंगानिसामानिगायेत्। कायमानइतिवैश्वानरव्रतं॥
ऋषिर्वैश्वानरः॥ बृहतीछंदः। घर्मोदेवता। ओ३१म्। ३। आयुः। २ज्योतीः। ३ज्योतोवा३ज्योतोवा
हायि। २ज्योतोवा३हा उ। वा। इहस्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत्। इंदुरिडासत्यम्। सत्यम्। २स
त्योवा३सत्योवाहायि२। सत्योवा३हाउ। वा। इहस्व०हत्। कायमानोवनातुवाम्। तुवाम्२तुवौवा

तुवोवाहायि।२तुवोवा३होउ।वा।इहस्व॰हत्। [illegible] द्यौर्भू तंपृथिवी।पृ
थिवी२।पृथिव्योवा३पृथिव्योवाहायि।२पृथिव्योवा३होउ।वा।इहस्व॰हत्।यन्मात्र रजगन्न
पाःआःपाः।२आपोवा।३।आपोवाहायि।२आपोवा३होउ।वा।इहस्व॰हत्।सहस्तेजआपः।आपः।
आपः।आपोवा३आपोवाहायि।२आपोवा३होउ।वा।इहस्व॰हत्।नतत्तेअग्नेप्रमृषेनिवर्तनाम्।
तनाम्।२तनोवा३तनोवाहायि।२तनोवा३होउ।वा।इह॰हत्।उषादिशोज्योतिः२ज्योतिः।२ज्यो
तोवा३ज्योतोवाहायि।२ज्योतोवा३होउ।वा।इह॰हत्।यदूरेसन्निहाभुवाः।भुवाः।२भुवोवा३।
भुवोवाहायि।२भुवोवा२होउ।वा।इह॰त।ओ३१म्।३आयूः।३।ज्योतीः३ज्योतोवा३ज्योतोवा
हायि।२ज्योतोवा३होउ।वा।घर्मोमरुद्भिर्भुवनेषुचक्रदत्।इ ह।इडा२३४५॥सहोभ्राजोतींद्रस्या
वधस्तंगायेत्॥इंद्रऋषिः।त्रिष्टुप्छंदः घर्मोदेवता।होउ।३सहोभ्राज२सहोभ्राजा।पोभ्राजा। ७
पोभ्राज।अभ्राजीत्।३।अभ्राजीत्।३अदिद्युतत्।अदिद्युतद्विश्वंभूतं॰सहोबृहात्॥अदिद्युत

अभ्राजीत्।३।

द्भ्राट्।भ्रा२भ्राट्।अदिद्युतद्धर्मोअरूरू२चात्।अदिद्युतद्धर्मउषसोअरोचा२या:।होउ।३सहो
भ्राज।२सहोभ्राजा।पोभ्राजा२पोभ्राज।अभ्राजीत्।३।अदिद्युतत्।३अदिद्युता२त्।होउवा।
ए।अदिद्युतद्धर्मोअरूरुचदुषसोदिविसूर्योविभाती२३४५होउहोहाइ३अंतरिक्षं॰स्व॰र्दिवं
जग।न्मा।अं॰।३।परात्परमैरया।ता।परात्परमैरयत।ओहोवाहाउ।वा।ए।पृथिव्यंतरिक्षंद्योरापः
कनिक्रदासिंधुरापोमरुतोमादयंतांघर्मोज्योतिः॥गोधवक्रात्।विष्णोत्रीणिस्वरीयांसिपंचा
नुगानेद्व्यनुगानंचतुरनुगानंसकृज्ज्ञायेत्।त्रयाणांसाम्नामुत्तमानुगानानांयज्ञायथात्र
क।मघवाऋषिः।विष्णुर्वा।अनुष्टुप्छंदः।घर्मोदेवता।होउहोहायि।३अंतरिक्षं॰स्व॰र्दिवं
जग।न्मा।३परात्परमैरया।ता।२परात्परमैरयत।ओहोवा।होउ।वा।ए।यज्ञोदिवो मूर्धादेव
मादनोघर्मोज्योतिः।होउहोहायि।३इत्यादि।ता।३दिवोमूर्धानं॰समीरयन्।होये३हो२३४
वा।यज्ञो।घर्मोज्योतिः।यज्ञः।समैरयन्।होये३हो२३४वा।तेजोघर्मोज्योतिः।तेजः।समैरयन्।

परात्परमैरया।ता।

होयि।३।हो२३४वा।ऋवर्धर्मोज्योतिः।ऋवःसमैरयन्।होयि।३।हो२३४वा।ज्योतिर्धर्मोज्योतिः।
ज्योतिःसमैरयन्।होयि।३।हो२३४५वा।६५६।घर्मोघर्मोज्योतिः।हाउहोहाइत्यादि।त।३।औहो
वाहाउ।वा।ए।इडांपऌहस्कृतियच्छ।ए।मनओजोयच्छ।ए।मनोमहिमानंयच्छ।ए।यशस्त्विषिंय
च्छ।ए।प्रजांवर्चोयच्छ।ए।पशून्वि शंयच्छ।ए।ब्रह्मक्षत्रंयच्छ।ए।स्वर्ज्योतियच्छ।होउहोहायिइत्या
दि।ता।३।यज्जायथाअपूर्व्या।मघवन्वृत्रहत्याया।तात्पृथिवीमप्रथायाः।तदस्तभ्नाउतोदाि
वाम्।हाउहोहायिइत्यादि।त।औहोवाहाउ।वा।ए।तेजोघर्मःसंक्रीडंतेशिश्रुमतीर्वायुगोपा
स्तेजस्वीतीमरुद्भिर्भुवनानिचक्रदुः।इट्।इडा।२३४५ई२३४५॥ द्व्यनुगानं।हाउहोवा।३।
परात्परंमेरय।ता।२।परात्पर०ता।औहोवाहाउ।वा।इंद्रोधेनुः।३।आपोधेनुः।३।भूमिर्धेनुः
३।अंतरिक्षंधेनुः।३।द्यौर्धेनुः।३।परंधेनुः।३।व्रतंधेनुः।३।सत्यंधेनुः।ऋतंधेनुः।इडाधेनुः।स्व ८
र्धेनुः।ज्योतिर्धेनुः।३।हाउहोवा।३।परात्परइत्यादि।ता।यज्जायथाः।अपूर्विया। ।अपूर्विया३

आपूर्वा।२३४या।मघवन्वृ।त्रहत्याया।त्रहत्याया।३त्राहत्या२३४या।तत्पृथिवीम्।अप्राथयाः।
अप्राथयाः।३।आप्राथा२३४याः।तदस्तभ्नाः।उतोदिवाम्।उतोदिवा३म्।ऊतोदा२३४इवाम्।हा
उहोवा।३।परा०त।औहोवाहाउ।वा।ए।तेजोघर्मःसंक्रीडंतेवायुगोपास्तेजस्वतीर्मरुद्भिर्भुवनानि
चक्रदुः।चतुरगानं।हा।२।ऊवाक।३।होवा।होवा३हाउवा।एतोकप्रजांगर्भोनोयमदधन्द्याचप
राचपथिभिश्चरंता।२३४५ः।हा२उवाक।३।होवा।३।अयंसत्रिडुक्ते३।होयि।यस्माद्यावापृथि
वीभुवनानिचक्रदुः।होयि।अय ॱ त्रिडुक्तः३।होयि।यस्मादापओषधयोभुवनानिचक्रदुः।हो
यि।अयꣳसत्रिडुक्तः३।होयि।यस्मात्समुद्रियावनानिचक्रदुः।होयि।अयꣳसत्रिडुक्तः३होयि।य
स्माद्भुवनानिचक्रदुः।होयि।हा२उवाक३।होवा२।होवा३।हाउवा।ए।आपः।आपः।आपा२३४
५हा२उवाक।३।होवाक।३।येभिर्विया।श्वमेराया२ः।तेभिर्विया।श्रुहीमादा।२म्।येभिर्हिता
म्।सहःसाहा२ः।तेभिस्तेजआपः।आपा२ः।येभिर्व्यंतरिक्षमेरया३।हाउवा।ए।आपः।आपा

इमांल्लोकानरौचयः।हौयि।४५

उ.त.प्र. ९ २३४५ः।हा२।उवाक।३।होवा।२।यज्जायथाअपूहो२र्वी या।२ मघवन्वृत्रहाहो२। त्याया३ तत्पृ
थिवीमप्राहो२।थाया२ः।तदस्तभ्नाउतोहो२यि।दायिवा२म्।हा२उवाक।३।होवा२ होवा३हाउवा।
ए।तेजोघर्मः संक्रीडंते शिश्रुमतीर्वायुर्गोपास्तेजस्वतीं मरुद्भिर्भुवनानि चक्रदत् २३४५ः।रुचितो
घर्मइत्युक्ते उद्यन्ल्लोकानरोचयइति घर्मरोचनं सकृद्गायेत्।ऋषिरिंद्रः।वसिष्ठोवा।सर्पोवा।स्तु
पइत्यन्ये अनुष्टुप्छंदः।घर्मोदेवता।उद्यन्ल्लोकानरोचयः।हौयि।प्रजाभूतमरोचयः।हौयि।
विश्वंभूतमरोचयः।हो२हो२३४ औहोवा। घर्मोज्योती २३४५ः।अस्मिन्काले इंद्रस्यरोचनं वाज्ञ
नइतिवागायेत्।तस्यापि ऋषिरिंद्रः।त्रिष्टुप्छंदः।घर्मोदेवता।वाक्मनः प्राणः श्रोणापानोव्या
नश्चक्षुः श्रोत्रं ब्रह्मवर्मस्तुतिः प्रतिष्ठा। आदित्यः पित्र्यम्।३।आयुः पित्र्यम्।पंचानुगाने वर्तमा
नेयदारुचितो घर्मइत्याह तदा तत्सामापोह्यउद्यन्ल्लोकानितिगायेत्।एवं कायमानादिषु वर्त ९
मानेषु अपोह्यगानं।पूर्वरोहिणपुरोडाशे आहूयमाने प्रस्तोता इंद्रंनरइति राजानं सकृद्गायेत्॥

ऋषिरिंद्रः।त्रिष्टुप्छंदः।घर्मोदेवता।इ्म्।३।हो३ह२ं३ ओहा३ औहोयि।२ औहोयि।इंद्रंनरो।
ने३मधि।ताहवंतायि।३वयोवृहत्।३ विश्वाष्टयेविधर्मणे।३ यत्सारियाः युनजा।तोयिधियस्ताः
३।सत्यमोजः ३।रजःस्तवः।३ शूरोनृषा।ता।३श्रव।सश्चकामायि।३ भद्र२ंस्कधा२ भद्र२ंस्कधे।प
मूर्जम्।२।आगोमतायि।व्रजेभा।आतुवन्नाः।३ वृहद्घ्रा।३ दिविदधे।३हस्ता२ दिविदधे ३हो
उवा।वाँगीडाकवेवृहद्घ्रो २३४५ः॥अध्वर्युर्गगएहीत्युक्त्वा यदावत्संमात्रा उपसृजति तदाप्रस्तो
तास्वादिष्ठयेति धेनुसाम सकृद्गायेत्।प्रजापतिर्ऋषिः तुरश्रवाइत्यन्ये।गायत्रीछंदः।घर्मोदे
वता॥हाउ।२।हाउ।ओहा२।ओहायि।इयाहाउ।२।इयाहाउ।औहो१यि।औहो१या।२३४ औहो
वा।५ भुवत्।इडा।२३ स्वादिष्ठया।मादिष्ठया।जनत्।इडा२३ पवस्वसो।मधारया।दधत्।इडा२३इ
डायेपा।तोवायिस्तृताः।करत्।इडा २३हाउ।२।हाउ।ओहा२ ओहायि।इयाहाउ।औहो१यि।ओ
होयि।१२।या२३४।औहोवा।ए।३।धेनू।अयंवार्षागण्यापक्षः।गोतमपक्षस्तुभुवत्।इडेत्या
इयाहाउ।

द्विवतस्तृणांदेवतानामेकैकस्यादेवतायापुरस्तात्स्तोभमोहोवात्तंब्रूयात्।अथऋक्पादानामेक
स्यपुरस्तात्होइअंतमेवस्तोभमाहरेत्॥करत्इडेत्यस्यादेवतायाअनंतरंहोइत्यंतस्तोभमाश्रित्य
इड्रायेतित्तीयंपुनरस्यस्ययथाधीतंसमापयेत्।हाउ।२।हाउ।ओहा२ओहायि।इयाहाउ।इया
हाउ।ओहो१यि।२ओहो१२या।२३४ओहोवा।भुवत्।इडा२३हाउ।२।हाउ।ओहा२।ओहोयि।इ
याहाउ।२।इयाहाउ।ओहो१यि।३स्वादिष्ठाया।मादिष्ठया।हाउ।२हाउ।०।या।२३४ओहोवा।ज
नत्।इडा।२३हाउ।२।हाउ।ओहो१यि।३पवस्वसो।माधारया।हाउ।२।हाउ।०।या।२३४ओहो
वा।दधत्।इडा२३हाउ।२।हाउ।ओहो१यि।३।इंद्रायपा।तोवाइस्सुताः।हाउ२।हाउ०या२३४
ओहोवा।करत्।इहा।२३।हाउ२।हाउ।ओहो१यि।इ।इंद्रायपा।तोवाइस्सुताः।हाउ।२।हाउ।०।
या।२३४।ओहोवा।ए।धेनू।अंयंगोतमपक्षः॥पयसोराहरणकालेप्रस्तोताअग्नेयुंक्ष्वेतिप १०
यःसंज्ञकंसामसकृद्गायेत्।प्रजापतिर्ऋषिः।तुरश्रवाइत्यन्ये॥गायत्रीछंदः।घर्मोदेवता।इयो२

इया।इयो।२।इया।इयो३।इया।अग्ने।युंक्ष्वाही३।येतवा।अग्नेयुंक्ष्वाहीयेतवा।इयो३।इया।
इयो२इया।इयो३।इया।अश्वासोदायिवा।३।साधवाः।अश्वासोदायि।वासाधवाः।अश्वा
सोदायिवा३।साधवाः।इयो३।इया।इयो२।इयाइयो३।इया।अरंवहंती।३।आशवाः।अरंव
हा।तीआशवाः।अरंवहंती३आशवः।इयो३इया।इयो२इया।इयोइया३उवा।३।आ।२।३ह
स्।ए३पया।२३४५ः॥२७॥प्रस्तोताआसेचनकालेआत्वाविशंत्विंदवइतिसिंधुसामसकृ
द्गायेत्।असितऋषिः।गायत्रीछंदः।घर्मोदेवता।आत्वाविशंत्विंदा६वाः।समुद्रमिवसिं
धवः।समुद्रमि।वसिंधा।२३।वाः।नत्वामिंद्रा।तिरिच्यते।नत्वामा।२३।इंद्रा।तिरिच्या।२३ता
३४३यि।ओ२३४५यि।डा॥२८॥प्रस्तोताशफाभ्यांपरिग्रहणकालेप्रथश्चयस्येतिवसिष्ठ
शफौसकृद्गायेत्।त्रिष्टुप्छंदः।वसिष्ठऋषिः।घर्मोदेवता॥हाउप्राथाः।चयस्यसप्रथाः
।चनार्मा३उवा३इहा३।ऊवायि।ओ२३४वा।इ।२३४डा।धातुर्धुतानोत्सवितुः।चवार्थि।
४ओनुष्टुभस्यहविषः।हवारथिः।या३उवा३इहा।३ऊवायि।ओ२३४वा।इ।२३४डा।४१

स्वा३१उवा२३ईडेत्यादि।हो।रथंतरमाजभारा।वसौयि।४

विष्ठा३उवो३ईहेत्यादिडा।रथंतरमाजभारा।वसा२यि।ष्ठा३उवो३ईहेत्यादि।डा।ए३।घृत॥
२९॥ग्राथोः।चषस्यसप्रथः।चे ना।२मा।३१उवा२३ईडा।३।हौयि।हो।वाहा३१उवा२३ई२३४
हो।आनुष्टुभस्यहविषः।हवा२।यिः।या।३१उवा२३ईडेत्यादि।हो।धातुर्द्युतानात्सवितुः।च
वा२यि।ष्ठा३१उवा२३।ईडेत्यादि।हो।ए।३ऋता२३४५ः॥३०॥प्रस्तोनामहावीरेक्रियमाणे
इंद्रंनरइतिव्रतपक्षोसकृद्गायेत।त्रिष्टुप्छंदः।प्रजापतिऋषिः।घर्मोदेवता॥होउ३हं
हंहंहं।३।होउ।३।इंद्रंनरोनेऽमधि।तोहवंतायि।यत्पारियाः।युनजंतायिधियस्ताः
।शूरोन्रषा।।तो३श्रव।सश्वकामाइ।आगोमतायि।व्रजेभ।जातुवन्नाः।होउ३।हंहं
हंहं।३होउ।वाः।३।ई२३४५॥३१॥होउ३इहा।हंहंहं।३।इदंनरोपूर्ववत्।होउ३
वा।३।ई२३४५॥३२॥प्रस्तोताघर्मेकृतेइमाउवामित्यश्विनोर्व्रतेसकृद्गायेत॥बृहतीछं ॥११॥
दः।अश्विनावृषिः।घर्मोदेवता।होइहा३।इहोइहा३।एवंत्रिः।इमाउवांदिविष्टया।औ

होउ।उस्राहवंतेअश्विना औहोउ।अयंवांमह्नेवसेशचीवसू औहोउ।विशंविशंहिगच्छथा।
औहोउ।होइहा३ईहोइहा।३ईहोइहा।३।२।पं०२इहोइहा।३।ईहोइहा।३४औहोवा।ई५हीही
हाहीही॥३३॥होइहा।इहोइहा।३।इमाउवांदिविष्टयाहोहोउ।उस्राहवंतेअश्विनाहोहोउ।अयं
वामह्नेवसेशचीवसूहोहोउ।विशंविशंहिगच्छथाहोहोउ।होइहा।२।इहोइहा३।होइहा।इहोइ
हा३४।औहोवा।ई२।३॥३४॥प्रस्तोताद्वितीयरौहिणपुरोडाशेहूयमानेइंद्रंनरइतिरौहिणंगायि
त्।ऋषिरिंद्रः।त्रिष्टुप्छंदः।घर्मोदेवता।होउ।३।आयिही३।आयिहिया।३।आसाउ।३।आया
म।३।नामाः।३किट।२।इंद्रंनरोनेमधितोहवां।२।तायि।यत्पारियायुनजतेधियाः।२स्ताः।शूरो
न्रषातां।३वसश्वका२माइ।आगोमतिव्रजेभजात्वा२न्नाः।मना२३होयि।प्राणा२३होयि।
चक्षू२३होयि।श्रोत्रा२३होयि।घोषा२३होयि।व्रता२३होयि।भूता।२३होयि।पाना२३
होयि।चिता२३होयि।धीता२३होयि।स्वा२३होयि।ज्योता२३हो२वा२३४।औहोवा।

ऊ२३४५॥३५॥ अध्वर्युर्घर्मायोत्साद्यमानायानुब्रूहीतियदाब्रूयात्तदारू०वदांगिरसंप्रस्तोतात्रि
गायेत्॥ ऋषिरंगिराः। अनुष्टुप्छंदः। घर्मोदेवता॥ आरो३हान्। ३। इत्एत्ऊ३दारू१हार२न्। दिवः
पृष्ठानी३यारू१हार२न्। प्रभ्रर्जयोया३थापा१था२। उद्यामंगिरा३सोया१यू२ः आरो३हान्। २।
आर२३रोर। हार२३४औहोवा। स्त२३४वाः॥३६॥ एतानिसामानिप्रतिवर्ग्यंगायेत्॥ कायमानो०।
सम्राजा०हाउहोहायि०३। हाउहोवा। हार२ऊवाक्। इत्येतानिलिंगवियुक्तानि। लिंगस्यकेवल
स्याविनियोजकत्वान्नंगानंकुर्यादित्यन्ये। स्रुब्रह्मण्याह्वानेह्येहेस्रुत्यामागछेतिवदेत्। स्रुब्रह्म
ण्याह्वानेश्वःस्रुत्यामागछमघवन्निति विशेषः॥ प्रतिवर्ग्योद्वासनकालेप्रस्तोताउत्तरेणसम्राडा
संदीगत्वापश्वत्तिष्ठन्नध्वर्युप्रेषितस्त्यग्नायिरितिप्रवर्ग्यसामत्रिषुपरिस्थानेषुसकृद्गायेत्॥ त्रि
रितिकेचित्। बृहस्पतिर्ऋषिः। अत्यष्टिछंदः। अग्निर्देवता। स्तोभान्प्रतिपादंवदेत्॥ निधनांते १२
स्तोभांतेवाइतिब्रूयात्। एविश्वमित्यादित्रीणिनिधनानिमंद्रस्वरांतंकर्षतोयुक्ताः सर्वेब्रूयुः। प

त्नीचब्रूयात्। त्यग्नायिः। प्रतिदहति। हाउहो५हाउ। अग्निं२हो। तारंमा३न्ये३दास्वंतंम्। त्यग्नायिः
प्रतिदहती। हाउहो५हाउ। वसोः। सूनुं२सहसोजा३ता३वेदसं। त्यग्नायिः। प्रतिदहती। हाउ०विप्रा
म्। नजा३ता३वेदसम्। त्यग्ना०यऊ। र्ध्वया३स्त३वध्वरः। त्यग्ना०देवो। देवा३ची३याकृपा। त्यग्ना
०घृता। स्यविभ्राष्टिमनुष्ट३क्रा३शोचिषः। त्यग्ना०आजु। ह्वाना३स्या३सर्पिषः। त्यग्नायिः
प्रतिदहती। हाउहो५हाउ। वा। ए। ३विश्वंसमित्रिंदहा२३४५। ए३विश्वंव्यत्रिणंदहा२३४५।
ए। ३विश्वन्यत्रिणंदहा२३४५। प्रस्तोतापूर्ववत्यग्नायिरितिगायेत्॥ पूर्ववत्सर्वनिधनंवदंति। स
र्वेउपरवदेशंप्रत्याक्रामंति। प्रस्तोतापूर्ववत्यग्नायिरितिगायेत्। सर्वेनिधनानिपूर्ववद्ब्रूयुः। ततो
गछंति। प्रस्तोतापरिषिच्यमानेघर्मेपरिषेकजलमुपस्पृश्यअचिक्रदतिवार्षाहरंत्रिर्गायेत्।
ऋषिर्वृषाहरिः। प्रजापतिर्वा। गायत्रीछंदः। सोमोदेवता। अचिक्रदा३त्। अचिक्रदा३त्। अचि
क्रदा५वृ। वृषाहरा३यि। वार्षाहरो३इ। वृषाहरा२ए। महान्मित्रा३ः। महान्मित्रो३ः। महान्मित्रा५ए।

नेदर्शीता३ः। नादर्शीता३ः। नदर्शीता५। ए। सं२ंस्तूरिया३यि। साउंस्तूरिया३यि। सं२ंस्तूरिया५
ए। णदिग्धता३यि। णादिग्धता३यि। णदा५३घ्नताउवा३९॥ प्रस्तोता परिषिक्ते घर्मे इष्टाहोत्री
त्रिर्गायेत्॥ गायत्री छंदः। अप्सरऋषयः। आपोवा। इंद्रोवा देवता। घर्मोपयुक्ताः सर्वे निधने
ब्रूयुः। इष्टाहोत्राः। आस्तेक्षा२३४ता। इंद्रं हृधा। तो२ध्वो२३४रायि। आच्छा३वो स्तृ। थमो३ओ
५सा६५६ए३। उदधिर्णिधी १ः॥३९॥ प्रस्तोता रैयेतेनान्वेहीत्यक्ते॥ अथेतत्प्रस्तोता वास आ
दत्ते। येन पत्न्या वृता भवति। प्रत्याव्रजन्नभिप्रवइति रैयेतं तृचं गायेत्। एकस्यां वा तृचे वाय
जमानो निधनं ब्रूयात्॥ यदा एकस्यां तदा प्रथमायां वा स्तोत्रियायां। ऋषिरैयतः प्रजापतिः।
बृहती छंदः। इंद्रो देवता। अभिप्रवः सुरा। धसा३४औहोवा। आइंद्रमर्च। यथाविदा।२३४यि।
औहा। योजरितृभ्यः। माघा२३वा। पुरूवा।२३४सूः सहस्रेणायि। वा३ना। ऊंमायि। क्षा२ ॥१३॥
तो२३४औहोवा। वा२३४स्त्। सहस्रेण वन्नि। क्षता३४औहोवा। साहस्रेण। वशायि क्षता२३४

यि। औहा। त्रातानीकेव। प्राजा२३यिना। तिधा२ष्ठू।२३४या। हंति वृत्राणी३दा। ऊंमायि। भूरषा२३४
औहोवा। वा२३४स्त्। हंति वृत्राणि दाशुषा३४औहोवा। हांति वृत्रा। णिदाशुषा।२३४यि। औहा। गिरेरि ६
वप्र। रासा२३ आस्यपा२यि। —न्वो२३४यिरायि। दत्राणि पुरु३ष्यो। ऊंमाइ। जा२सा२३४औहोवा। वा२३४
स्त्॥४०॥ प्रस्तोता पूर्वया द्वारा शालां प्रविश्य उत्तरेणाग्नीन् आत्वा पश्चाद्गार्हपत्यस्य तिष्ठन्नासीनो वाम
हावीरायनं प्रेक्षमाणो वामदेव्यं तृचं गायेत्। कयानश्चित्र आभुवदिति वामदेव्यं साम वामदेव ऋषिः
गायत्री छंदः। विश्वेदेवा देवता। काः५या। नश्चा३यित्रा३आभुवात्। ऊ। ती सदावृधः सा२खा। औ२हो
हायि। कया२३शचा२यि। ष्ठयौहो३ऊंमा२वाः२र्ती३५हायि। काः५स्त्वा। सत्यो३मा३दानाम्। मांउंहि
ष्ठोमा त्सादंधः। सा। औ३हो हायि। दृढा२३चिदा। रुजौहो३ऊंमा२वाः२सो३५हायि। आ०५भी। षु
णाः३ः सा३खीनाम्। आ। विता। जरायितॄ। णाम्। औ२हो हायि। शतं२३भवा२सियौहो२ऊंमा२
तां यो३५हायि॥४१॥ प्रस्तोता अग्निप्रणयनकाले अग्निमनुव्रजन्नग्निर्मूर्धा इत्याग्नेयव्रतं गायेत्॥
३२

ऋषिरग्निः।गायत्रीछंदः।अग्निर्देवता।हाउ२हाउ।आ्रोजाओवा।३।अग्निर्मूर्धादी३वाःको१कु२
त्पतिःपृथिवी३याओ१यार२म्।अपाꣳरेताꣳसी३जाइन्वो१ती२३हाउ।२।हाउ।आ्रोजाओवा।२।आ्रो
जा३ओ५वा६५६ऍ।विश्वस्यजगतोज्योती२३४५ः॥४२॥अध्वर्युणाखननेप्रेषेअभिहितेउद्गा
तारवनति।यदाअध्वर्युरौदुंबर्युच्छ्रीयते।इत्याहतदाअध्वर्युणासंहोच्छ्रयति।द्युतानस्त्वामारुतंद्यु उ
यन्नूद्दिवꣳस्तभानांतरिक्षंपृणदृꣳसपृथिवींतामन्वारभतेइतिउद्गाताओदुंबरीमुच्छ्रयिष्यन्पूर्वे
णदेवयजनंगच्छेत्।उभयपक्षेपिअंतराचात्वालोत्करोउपविश्यसदःपूर्वद्वारेखाताग्रभ्रोअंत
रेणप्रविश्यपूर्वमेवप्रागग्रंनिहितायाऔदुंबर्याअग्रेणगत्वादक्षिणतउदङ्मुखस्तिष्ठन्।औदुंब
रीश्वभ्रेवदध्यात्॥आयोह्यासदनेसादयाम्यवतश्छायायाꣳसमुद्रस्यहृदयइतिअवधायजपेत्॥
नमःसमुद्रायनमःसमुद्रस्यचक्षसेमायायूनर्वाहासीदूर्गस्यूर्जोदाऊर्जंमेदेह्यूर्जंमेदेत्यन्तंमेधही
ति॥तामौदुंबरींछंदिष्यौरेहनात्पूर्वंनविसृजेत्।उद्गाताअध्वर्युवद्विग्राग्रेवहिरण्यंनिधायस्रुवाद्

॥१७॥

स्याभिजुहोति॥घृतेनद्यावापृथिवीआप्रीणाताꣳस्वाहेति॥आभूमितलमाज्येनप्लावयति॥द्याव
वापृथिवीभ्यामिदंनमम॥प्रजापतयेस्वाहेतिपूर्ववद्वितीयाहुतिं॥प्रजापतयइदं०॥अथवान्यत
रेणप्रथमाहुतिंहुत्वास्वाहेत्येवद्वितीयामाहुतिंजुहोति॥अनुक्तद्रव्येषुहोमेषाज्येनैवसर्वत्रहो
मःकर्तव्यः॥विशाखस्याधस्तादौदुंबरींहस्तद्वयेनपरिगृह्णाति॥दिविदेवान्दृꣳहमयिप्रजामि
ति।मध्येपूर्ववत्परिगृह्णाति॥अंतरिक्षेवयाꣳसिदृꣳहमयिपशूनिति॥मूलेनपरितथैवपरिगृ
ह्णाति।पृथिव्यामध्योषधीर्दृꣳहमयिसजातानिति।उद्गाताछदिराछादनकालेजपेत्॥दिव्यं
छद्मासिसंततिनामविश्वस्यजनस्यछायानमस्तस्मामाहिꣳसीरित्युक्त्वायथेतंनिष्क्रामेत्॥
अथवासदसिस्थूणानिधानार्थाछ्वभ्रादक्षिणेनगत्वाऽपरोद्वार्यौछ्वभ्रावंतरेणप्रचोदुंबर्युच्छ्रवण
दिकंकुर्यात्॥उत्तरेणश्वभ्रागत्वाऽपरोद्वार्यौश्वभ्रावंतरेणप्रपद्यतदुच्छ्रयणादिकंकार्यमितिधा
नंजप्यः॥सर्वेष्वपिपक्षेषुयेनमार्गेणप्रविष्टस्तेनैवनिष्क्रामेत्॥प्रस्तोताअग्नीषोमप्रणयन
कालेऽग्निर्मूर्धेत्यग्नेर्व्रतमनुव्रजंत्रिर्गायेत्॥अग्निर्ऋषिःगायत्रीछंदः॥अग्निर्देवता॥तद

नंतरमेवसोमव्रतमनुब्रजंत्रिर्गायेत्॥ ऋषिः सोमः॥त्रिष्टुप्छंदः। सोमो देवता॥ सोमंपूर्वंनयंति
चेत्सोमव्रतंप्रथमं गायेत्॥ओवा।२।३। संतेपया। सि२समु। यंतुवाजाः। संवृष्ण्या। नी ३ अभि। माति
षाहः। आप्यायमानो३अमृ। ताय सोमा। दिविश्रवांसी ३ऽउत। मा निधिष्व। ओवा २।२। ओ २ वा २३४
औहोवा। म्य३॥४३॥ त्रिर्निगिरेत्। निगरेणमेवनिधनं। उद्गातृप्रस्तोतृप्रतिहर्तारोंतर्वेदितिष्ठंतः
पूर्वंयूपमुच्छ्रीयमाणमनुमंत्रयेरन्। बहिर्वेदिवातिष्ठंतः॥ नमणऊर्ध्वभरसंस्तोर्ध्वभरा दृशेयमि
ति। केचिज्ज्योतिष्टोमेयूपेकादशिनीमिच्छंति। तदानमणसऊर्ध्वभरादृशेयमित्यूहः। केचित्त
कृतित्वादूहंनेच्छंति। तदामंत्रस्यलोपएव। औपवसथ्येहनिस्वाध्यायाध्ययनंकुर्युः। अप्रथस्त
नायज्ञियवृक्षसंबंधिनीः प्रादेशमात्रीस्त्वक्तः प्रदेशोकुशलेणबहुन्नतपृष्ठाः समीकृतभिन्न
प्रदेशा अंगुष्ठपर्वपृथुमात्रीर्यथा। मूलंस्थूलायथाग्रंसूक्ष्मास्त्वज्योतिष्टोमेएकविंशतिसंख्या
युक्ताकुशास्तीक्ष्णाः तक्ष्णाः कारयित्वातांगंधवतीभिरोषधीभिर्हरिद्राकुंकुमादिभिरनुलिप्य
कुशाविधानेनक्षौमादिनावासेनवध्वोदुंबर्याउपर्यावासयेत्। सुब्रह्मण्यः। अग्नीषोमीय

वपायांहुतायामध्वर्युणासंप्रेषितो आग्नानेतीर्थेनप्रपद्य उत्तरेप्राङ्मुखस्तिष्ठत्सनामग्रहं। सुब्र
ह्मण्यामाह्वयेत्पूर्ववत्॥ गोतमब्रुवाणेत्यंतमुक्त्वा सुत्यादेशात्पूर्वंयजमानस्याभिवादनीयंना
मगृह्णीयात्। दीक्षितदेवदत्तशर्मायजते॥ ततोयजमानस्यपितुर्मातुश्चनामगृह्णीयात्॥ यज्ञ
शर्मणः पुत्रोयजते। श्रीदेवीदायाः पुत्रोयजते। ततः पितामहस्यपितामह्याश्च॥ विष्णुशर्मणः
पौत्रोयजते। देवकीदायाः पौत्रो०ततः प्रपितामहस्यप्रपितामह्याश्च। रुद्रशर्मणोनप्ताय०॥
उमादेवीदायानप्ताय०। द्विपितृकस्यद्विमातृकस्यचद्व्यादीनांपित्रादीनांनामग्रहणं। पूर्वेषां
नामग्रहणं॥ अथयजमानस्यापत्यानांस्त्रीपुंसानाजीवतांज्येष्ठक्रमेणनामगृह्णीयात्॥ दे
वशर्मणः पिताय०देवीदायाः पिताय०। अथपौत्रापत्यानांचनामगृह्णीयात्॥ कृष्णशर्म
णः पितामहोयजते०। रुक्मिणीदायाः पितामहोय०। अथप्रपौत्रापत्यानांनामगृह्णीयात्॥
केशवशर्मणः प्रपितामहोय०। भूमिदेविदायाः प्रपितामहोय० अथजनिष्यमाणानांपि

उ·त·प्र·
१६

तापितामहः प्रपितामहोयजतेइत्युक्त्वाश्वः सुत्यामितिनिगदेशेषंब्रूयात्।यजतिशब्देषु
प्रत्येकंविरमेत्।पुत्रवर्गात्पौत्रवर्गेज्येष्ठेपिपुत्रवर्गाह्वानंसमाप्यपौत्रवर्गस्यग्रहणं।यदापौ
त्रवर्गान्महद्वर्गोज्येष्ठस्तदापौत्रवर्गस्याह्वानं।समाप्यमहद्वर्गाह्वानं।पतितप्रव्रजितनपुंस
कमूकादीनांनामग्रहणीयात्॥अत्रनामग्रहणेप्रथमांतानांदेवदत्तशर्मेत्यादीनामंत्याक्ष
रमुदात्तं।षष्ठ्यंतानांयज्ञशर्मणइत्यादीनांचअंत्याक्षरमुदात्तं।तेषामेवपौत्तमंच।पितामह
प्रपितामहशब्दयोराद्यमध्याक्षरमुदात्तं।जनिष्यमाणानामित्यत्रसमक्षराणांमध्येद्वेअ
क्षरेउदात्ते।यजनइत्यस्यचाद्यक्षरमुदात्तं।निगदःस्वरःपूर्वमेवोक्तः।राज्ञोप्रेषितःसुब्रह्म
ण्यःसनामग्रहणंसुब्रह्मण्याह्वानंकुर्यात्॥ ॥अथप्रातःसवनेप्रस्तोताअध्वर्युराग्नीध्री
मै र्मिशर्मिनकालेउत्थायाचम्यशालामुखीयेहस्तप्रक्षालनंकृत्वाआग्नीध्रमंडपेपश्चात्प्राङ्मु १६
खआसीनःइमंस्तोममितियज्ञसारथिसामत्रिर्गायेत्॥ऋषिःकुत्सः॥जगतीछंदः॥

अग्निर्देवता॥प्रातःसवनेविनियोगः॥इमा२ंस्तो२३४माम्।अर्हाते२३४जा।तावेदसे२होयि।
रथामी२३४वा।सम्माहे२३४मा।मानीषया।३होयि।भद्राही२३४नाः।प्रमाती२३४रास्यासं२
सदे३होयि।अग्नायिसा२३४रव्यायि।मारायिषा२३४मा।वायंतवा।३।हो२३४५यिडा।यजमानः
प्राग्वंशंप्रविश्यशालामुखीयस्यपश्चादुदङ्मुखउपविश्यलोकद्वारमितिप्रथमसामत्रिर्गाये
त्॥पुष्कलऋषिः।गायत्रीछंदः।वसवोदेवता।लोकद्वारमपावार्ण२२पश्येमत्वावयं२रा२२
२ऊम्।आ२जायो।आ२३४५अथतस्मिन्नेवाग्नेप्राङ्मुखःस्रुवेणजुहोति।नमोग्नयेपृथि
वीक्षितेलोकक्षितेलोकंमेयजमानायविंदैषवैयजमानस्यलोकएतास्म्यत्रयजमानःपरस्ता
दायुषःस्वाहा।अग्नयइदं०पुरस्तादुपविष्टाश्चसर्वत्रसमिद्धामछंदोगपरिशिष्टे।स्वाहेतिद्वि
तीयां०प्रजापतय०अपापजहिपरिघंइत्युक्त्वोत्तिष्ठेत्।यदाहोताप्रातरनुवाकार्थमुपवे
शनंकरोति।अथयजमानउद्गारंप्रत्याहविश्वरूपाणांगानंमेगायेति।एवंयजमानेनोक्तः

प्रत्याचक्षीत चतुष्टोमसंपदतिरेकात्य्रहव्यास्त्राभावाच्चनाहंगायामीति॥ अथ यजमानः परि
हरति। वसतीवर्यौ ग्रहः। प्रातरनुवाकः शस्त्रं। आसांन च संपत्कोपः। यथान्यैः परिसामभिस्तस्तो
द्गायेत्याह। अथोद्गाता प्रातर्यावभ्यइति प्रातरनुवाकमुपाकरिष्यंतमध्वर्युं प्रत्याह। नमामनामंत्र्य
प्रातरनुवाकमुपाकुर्या दिति अथ ब्राह्मणोक्तमेवाह। अध्वर्यो मास्मये निवेद्य होत्रे प्रातरनुवाक
मुपाकुर्यादिति। अथोद्गातृयजमानौ हविर्धानस्य पूर्वया द्वारा प्रपद्य होतारं प्रातरनुवाकायोपविष्टं पू
र्वेणोत्तरतो गत्वा हविर्धानयोरनसोर्मध्ये पश्चाद्गत्वा दक्षिणस्य हविर्धानस्योत्तरं चक्रमाश्रित्य उद्गा
ता उदङ्मुख उपविशति। यजमानः प्रत्यङ्मुख उद्गातुः पुरस्तादुपविशति। उपवेशन मुभयोपित्र
ष्ठी। उद्गाता विश्वरूपास्त्रिर्गायति। पुष्कल ऋषिः पङ्क्तिश्छंदः विश्वरूपा देवता। युंजेवाचंꣳशत
पदी गायेसहस्रवर्तनि। गायत्रं त्रैष्टुभं जगद्विश्वारूपाणि संभृता। देवा ओकांꣳसि चक्रिरे। इत्यु
क्त्वा एकस्यां पंक्तौ त्रिर्गायेदिति धानंजय्यः। अनिरुक्तमेव गेयं। अत्र औंकारेणोद्गीथादानं कु

र्यात्। प्रस्ताराभावान्नतिहारः। युंजेवाचꣳशतपदीम्। इति प्रदेशिन्या उपरि आकाशे अंगुष्ठस्य स
कृद्भ्रमणं कृत्वा प्रदेशिन्यां निपातनं। पुनश्च प्रदेशिन्यां आरभ्य ताइति त्रिः कर्षणं कुर्यात्। अथ कुं
आ इति प्रदेशिन्या उपरि कौ ओ शे सकृद्भ्रमणं कुर्यात्। अथ आम् इत्याकाशे आरभ्य आ इति प्रदेशि
न्यां निपात्य कनिष्ठांतं प्रसारयेत्। एवं त्रिर्गायेत्। अस्मिन्काले एवं हिमनसेवयजमानो गायेत्॥ य
जमानस्यार्चिकानं चेति किंचित्। एवमार्चिक गानं॥ युंजेवाचꣳशतपदीम्। गायेसहस्रवर्तनिगाय
त्रं त्रैष्टुभं जगद्विश्वरूपाणि संभाता २। इति ताकारे आकाशे सकृद्भ्रमणं कृत्वा प्रदेशिन्यां नपातनं।
पुनः प्रदेशिन्या मारभ्या देवा ओ काꣳसि चा १२१२ इति चाकारे त्रिः कर्षणं कुर्यात्। कुंम् आ २ इति पूर्व
वत्कृत्वा को इरा। ओ २३ ४५ इति समापयेत्। एवं त्रिरावृत्तिः। अथ वा त्रिषु पदेषु गायेदिति गोतमः।
आद्येषु पादेष्वेका स्तोत्रिया। द्वितीयं पादमारभ्य त्रिषु द्वितीया। तृतीयं पादमारभ्य तृतीया। एवं गानं।
युंजेवाचꣳशतपदीम्। गायेसहस्रवर्तनी २ इति इकारेण सकृद्भ्रमणं कृत्वा। गायत्रं त्रैष्टुभा १२१२ इ

तिभाकारेत्रिः कर्षणं। ड्कुम्। आ२इतिसकृद्न्मणंकृत्वा। जागा। आ३ॅ५॥ इतिसमाप्तिः॥ गायेसह
स्रवर्तमानोम्। गायत्रंत्रैष्टुभंजागा२दितिगाकारेणसकृत्प्रमणंकृत्वा। विश्वारूपाणिसा१२१२इ
तिसाकारेत्रिः कर्षणं। ड्कुम्। आ२इतिसकृत्प्रमणंकृत्वा। भार्ता। आ३ॅ५इतिसमाप्तिः॥ गाय
त्रंत्रैष्टुभंजगोम्। वायिश्वारूपाणिसंभार्ता२इतितकारेसकृद्न्मणंकृत्वा। देवाओकाऽ२सिचा
१२१२इतिचाकारेत्रिः कर्षणं। ड्कुम्। आ२इतिसकृद्न्मणंकृत्वा। काइरो। आ३ॅ५इतिसमाप
येत्। एवंगायत्रीकारंगानं। प्रगाथकारंवाएवंगानं। युञ्जेवाचंॅशतपदीम्। गायेसहस्रवर्त
नी२इतिनीकारेसकृद्न्मणंकृत्वा। गायत्रंत्रैष्टुभ्सा१२१२इतिभाकारेत्रिः कर्षणंड्कुम्। आ२इ
तिपूर्ववत्। जागे। आ३ॅ५इतिसमापयेत्। गायत्रंत्रैष्टुभंजागोम्। गायत्रंत्रैष्टुभंजागा२इ
तिताकारेसकृद्न्मणंकृत्वा। विश्वारूपाणिसा१२१२इतिसाकारेत्रिः कर्षणंड्कुम्। आ२इति १८
पूर्ववत्॥ भार्ता। आ३ॅ५इतिसमापयेत्। विश्वारूपाणिसंभृतोम्। वायिविश्वारूपाणिसंभा

र्ता२इतितकारेसकृद्न्मणंकृत्वा। देवाओकाऽ२सिचा१२१२इतिचाकारेत्रिः कर्षणं। ड्कुम्। आ२इतिपू
र्ववत्। आ३ॅ५इतिसमापयेत्। एवंप्रगाथकारंगानं। एवंयजमानस्यार्चिकगानपक्षेअनयोः परि
पक्षयोः पूर्ववदार्चिकगानं। नविभागकर्मणासर्वदोड्कातुरनिरुमेवगानं। अथसुब्रह्मण्याह्वानं। अग्नी
षोमीयवपाहोमप्रभृत्येतदंतंसुब्रह्मण्याउत्करेअत्रापिसनामग्रहणं। अद्यसुत्यामितिविशेषः। य
दाहोता अभ्रइत्येत्याहतदोद्गातृप्रस्तोतृप्रतिहर्तारोआग्नीध्रेणतीर्थेनमहावेदिमाक्रमेयुः। सदाग्नि
शिरादेवानांनीचिंवेदिरसिमामाहिंॅसीरिति। अवाग्नदाग्निशिरेतिवेदिरसीत्यंतंबर्हिर्वेदिजपित्वाम
माहिंॅसीरितिवेदिमाक्रमेयुः। उद्गातृप्रस्तोतृप्रतिहर्तारोवसतीवरीणांहविर्धानप्रवेशकालेह
[illegible] [illegible] माक्रमेयुः। विष्णोः शिरोसियशोदायशोमयिधेहीति। ततोहवि
[illegible] आर्युषन [illegible] पार्श्वानां [illegible] विधारो अकुर्वंतोनसोतरेणेषेबाहु
[illegible] [illegible] माक्रमेयुः। अविभक्तश्वेतार्वेयुनजिमितेषथि

वीमग्निनासहयुनज्मिवाचं२ सहसूर्येणयुक्तोवाचोंतरिक्षेणतेसहयुक्तास्तिस्रोविप्रुजः सूर्यस्ये
तिसोमस्पर्शनासंभवेनदेशेबाहून्प्रसार्यमंत्रमेवजपेयुः। अथप्रस्तोतासोममतीत्यहविर्धानयो
र्मध्यतः प्रत्यङ्मुखः प्रथमंगच्छेत्। ततउद्गाताततः प्रतिहर्ताकेचित्तु। हविर्धानयोरंतराप्रस्तोता
प्रथमंप्राङ्मुखोगच्छतिततउद्गाता। ततः प्रतिहर्तेतिवदंति। एवंसर्पणंकृत्वादक्षिणस्यपश्चात्सव्य
पार्श्वेरावर्तमाना उपविशेयुः। ऋतस्यसदनेसीदामीतिदक्षिणेः पादैः सव्यवरणंकुर्वंतइतिकेचि
त्। उद्गातुर्दक्षिणतः प्रस्तोतोपविशेत्। उत्तरतः प्रतिहर्ताइहवचनचोदितेषुगमनकर्मसुसर्वत्रै
वसुपवेशनं। अथबहिष्पवमानस्यचातुस्वर्येणऋग्जपः कार्यः। जपतिचोदितेषुसर्वत्रैवंचातु
स्वर्येणऋग्जपंकुर्युः। पुरस्तात्॥ उपास्मैगायतानरः पवमानायेंदवे। अभिदेवाँ२ इयक्षते॥१॥
अभितेमधुनापयोथर्वाणोअशिश्रयुः देवंदेवायदेवयु॥२॥ सनः पवस्वशंगवेशंजनायशं १९
मर्वते। शं२ राजन्नोषधीभ्यः॥३॥ दविद्युतत्यारुचापरिष्टोभंत्याकृपा। सोमाः शुक्रागवाशिरः॥४॥

हिन्वानोहेतृभिर्हितआवाजंवाज्यक्रमीत्। सीदंतोवनुषोयथा॥५॥ ऋधक्सोमस्वस्तयेसंजग्मा
नोदिवाकवे। पवस्वसूर्योदृशे॥६॥ पवमानस्यतेकवेवाजिन्त्सर्गाअसृक्षत। अर्वंतोनश्रवस्यवः
॥७॥ अच्छाकोशंमधुश्चुतमसृग्रंवारेअव्यये॥ अवावशंतधीतयः॥८॥ अच्छासमुद्रमिंदवोस्तं
गावोनधेनवः। अग्मन्नृतस्ययोनिमा॥९॥ उद्गातृप्रस्तोतृप्रतिहर्तारः अध्वर्युणासोमाभिषुतद्र
स्कैकहस्तद्वयेनद्रोणकलशमालभेरन्। ऋतपात्रमसीति। द्रोणकलशमक्षस्याधस्तात्प्रांच
मक्षमनुस्पृशंतमेवंप्रोहेयुः। वानस्पत्योसिबार्हस्पत्योसिप्राजापत्योसिप्रजापतेर्मूर्धास्यत्यायुपा
त्रमसीदमहंमांप्रांचंप्रोहामितेजसेब्रह्मवर्चसाय। यदिप्रमाददक्षंस्पृशेयुः। तदानींद्रोणकलशं
पश्चादाकृष्यपुनरपिप्रांचंप्रोहेयुः। उद्गातादक्षिणेनहस्तेनदशापवित्रंगृहीत्वाअंतरेणाक्षवि
ष्कंभौ अक्षमस्पृशन्नादशापवित्रंद्रोणकलशेप्रास्येत्। अध्वर्युनज्मीसोममभिशिराभिनस्था
नंपुनः आप्याधिषवणचर्मणिदक्षिणपूर्वदेशमारभ्यप्रदक्षिणमवांतरदिक्षुपृथुभागान्यंत

उ॰त्र॰ग्र॰ राश्वतुरोग्रावाउत्तरपूर्वापवर्गान्युञ्ज्युः युक्तांस्तानभिमंत्र्य। जपेयुः। मरुतोनपातोपांश्वायाः
२० पर्वतानांककुभः श्येनाअजिराएंद्रवग्नुनाबहतघोषिणामीवांश्वातयध्वंयुक्तारूढवहतेति। अ
थवाद्रोणकलशग्रहणानंतरंतत्रैवस्थानेमरुतइत्यादिवातयध्वमित्यंजपित्वाततः सोमा
भिमर्शनस्थानंप्रत्याव्रज्ययुक्तारूढवहतेत्येतावन्मात्रेणग्रावयोजनंकार्यं॥ द्रोणकलशग्रहण
नंतरंयुक्तान्ग्राव्णोभिमंत्र्यजपेयुः। मरुतोनपातोश्वया॰ इत्यादियुक्तारूढवहतेति अथवात
तस्यसदनेसीदामीत्युपवेशनस्थानेमरुतोनपातइत्यादि॰ चातयध्वंइत्यंतंजपित्वाततः सो
माभिमर्शनस्थानमागत्ययुक्तारूढवहतेत्येतावन्मात्रेणग्रावयोजनंकुर्युः। तेषुद्रोणकलशं
पश्चादारभ्यप्रांचंदक्षिणतआरभ्यउदंचंवाध्यूहेयुः। इदमहमिमंयजमानंपशुभ्यअध्यूहामि। प
शुभुचमांब्रह्मवर्चसेचेति। ग्रावयोजनेद्रोणकलशाध्यूहनेचाध्वर्युणाकृतेत्रयोपिमंत्रान्े २०
जपेयुः। अथोद्गाताद्रोणकलशेस्यबुध्नसंमृज्यात्। वसवस्त्वागायत्रेणछंदसासंमृजंत्वि

तिअथमध्यदेशंप्राप्यरुद्रास्त्वात्रैष्टुभेनछंदसासंमृजंत्विति बिलं। आदित्यास्त्वाजागतेनछंद
सासंमृजंत्विति अथवाएतेषांत्रयाणांमंत्राणामेकैकेनमंत्रेणानुसवनंबुध्नादिनियमेनद्रोणक
लशंत्रिस्त्रिः संमृज्यात्। अपिवासर्वैर्मंत्रैर्बुध्नंसंमृज्यात्। सर्वैर्मध्यंसर्वैर्बिलमिति अथवाबिलंप्र
थमं। ततोमध्यंततोबुध्नं। अनंतरंदशापवित्रमवधूयउदग्दशमवाङ्नाभिद्रोणकलशेवितनु
युः। पवित्रंतेविततंब्रह्मणस्पतेप्रभुर्गात्राणिपर्येषिविश्वतः। अतप्ततनूर्नतदामोअश्नुते। शृतासइद्वह
न्तः संतदाशतेति अथवापवित्रंतइतिऋचेनसंतनुः। अंतर्यामानंतरमुद्गातासंततधारामनुमंत्रय
ते। प्रशुक्रैतुदेवीमनीषास्मद्रथः सुतष्टोनवाज्यायुषेमेपवस्ववर्चसेमेपवस्वविदुः पृथिव्यादिवो
जनित्राच्छृण्वंत्वापोधःक्षरंतीः सोमेहोद्गायममायुषेममब्रह्मवर्चसाययजमानस्यर्ध्यैसोमस्य
राज्ञोराज्यायेतिपश्चिमेनध्रुवस्थाल्याः संचरः यदाआग्रयणंगृह्णंत। अध्वर्युर्हिंकारोतिप्रतिहिं
कारंअग्निप्रस्तोताहंमानुषः॥ बृहस्पतिरुद्गाताहंमानुषः। वायुःप्रतिहर्ताहंमानुषः। अत्रवा

ग्यमनंत्रयाणांकृतस्यसदनइत्युपवेशनानंतरंवा।वेद्याक्रमणानंतरंवा।अत्रोद्गातादशापवि
त्रंहस्तेधारयन्नाज्योतिगानंकुर्यात्।अग्निर्ज्योतिर्ज्योतिरग्निरिंद्रोज्योतिर्ज्योतिरिंद्रः सूर्योज्यो
तिर्ज्योतिःसूर्यः।इत्येतेषुपदेषुत्रिस्त्रिरेकैकमभ्यासंमनसागायत्रंगायेत्।एतेषांज्योतिषांगाय
त्रीछंदः।ऋषिःपुष्कलः।अग्निरिंद्रायसूर्यादेवताः।एवंगानप्रकारः।अग्निर्ज्योतिर्ज्योतिरग्ना
म्।अग्निर्ज्योतिर्ज्योतिरग्नीः२।इत्यत्रसकृद्घूर्णनं।अग्निर्ज्योतिर्ज्योता१२१२इ।इतिताकारेत्रिः
कर्षणं।ह्रुम्।आ२इतिसकृद्घूर्णनं।आग्ना।ओ२३४५इतिसमाप्तिः।एवमुत्तरेसामनी।इंद्रोज्योति
र्ज्योतिरिंद्रोम्।आइंद्रोज्योतिर्ज्योतिरायिंद्राः२।इतिद्राकारेसकृद्घूर्णनं।इंद्रोज्योतिर्ज्योता१२१२
यिः।इतिताकारेत्रिःकर्षणं।हुम्।आ२इतिसकृद्घूर्णनं।आइंद्रा।ओ२३४५।इतिसमाप्तिः॥सूर्योज्यो
तिर्ज्योतिःसूर्योम्।सूर्योज्योतिर्ज्योतिःसूर्या२इति।याकारेसकृद्घूर्णनं।सूर्योज्योतिर्ज्योता१२१२इ
इतिताकारेत्रिःकर्षणं।हुम्।आ२इतिसकृद्घूर्णनं।सूर्योआ२३४५इतिसमाप्तिः॥अथवाग्रातरनु २१
कानंतरंआपोनप्त्रीयसूक्तात्पूर्वंहोतारमारभयिताज्योतिर्गानंबहिष्पवमानस्यस्तुत्यर्थंआस्ता

वंप्राप्यस्तोभयोगाष्टुरागायेत्।प्रातरनुवाकानंतरंगानपक्षेविश्वरूपाणांगानंयस्मिन्देशेयदभि
मुखेवागायेत्।अस्मिन्कालेचेदृतस्यसदनइत्युपवेशनस्थानेअथोपस्पृश्यउपस्तंभनाद्बर्हिमुष्टिंब
र्हिद्वयंचादायाहवनीयंप्रतिगच्छन्तमध्वर्युमुद्गातादक्षिणेनहस्तेनान्वारभते।उद्गातारंप्रस्तोतारंप्रति
हर्ताप्रतिहर्तारंब्रह्माब्रह्माणंमैत्रावरुणःप्रतिप्रस्थाताबाहविर्धानेएवान्वारब्ध्याआस्तावोपवेशनं
पर्यंतंनविछिंद्युःछंदोगास्ताकुः।अभिपीड्यपवित्रमध्वर्युर्निःसर्पतंप्रस्तोतासंतनुयात्।नमुद्गा
तोद्गातारंप्रतिहर्ताप्रतिहर्तारंब्रह्माब्रह्माणंयजमानइति।पवित्रंनिष्पीडनंप्रस्तोतृकर्मेकेचित्।
उद्गातृप्रस्तोतृप्रतिहर्तृणांपूर्वमन्वारंभकालेएवदक्षिणेनहस्तेनान्वारंभः।इदानींसव्येनहस्तेना
न्वारंभः।क्रमेणहोमः।सर्वेअपउपस्पृश्यजुहुयुः।अध्वर्युणाहुतेप्रस्तोताजुहोति।कुबेरानाम
सिजुष्टादेवेभ्योनमोवाचेनमोवाचस्पतयेदेविवाग्यमधुमत्तस्मिन्माधाःसरस्वत्यैस्वाहा।वाचे
सरस्वत्याइदं०।सूर्योमादिव्याभ्योनाष्ट्राभ्यःपातुवायुरंतरिक्षाभ्योग्निःपार्थिवाभ्यःस्वाहा।
सूर्यवायव्यग्निभ्यइदं०।उद्गाताप्रस्तोतृवद्वेआहुतीहुत्वातृतीयामाहुतिंजुहोति।ऋचंसा

मयज्ञामहेयाभ्यांकर्माणि कृण्वते। विते सदसि राजतो यज्ञंदेषु वक्षतः स्वाहा। ऋक्साभ्यामिदं
। प्रतिहर्ता चवेकुरेति सूर्योमेत्येताभ्यांजुहुयात्। उद्गातारो होमानंतरंजपेयुः। ब्रह्माहंगायत्रींवाचंप्रा
णंप्रजापतिंप्रपद्येऽस्मानमारवणंपर्यूहति। सर्वेउद्गातारः सर्पंतः सव्यैः पाणिभिः पृथक्दक्षिणानितृणा
निनिरस्येयुः। योद्यसोभ्योवधोघायूनामुदीरत्नेविषूकुहस्यधन्वनापतान्वरुणोधमदिति अपउपस्पृश्ये
युः। उद्गातारः अध्वर्यावनुप्रविष्टे तस्मात्सत्सकसं त्रेणोपविशेयुः। योमआत्मायामेप्रजायेमेपशवस्तेरह्
मनोवाचंप्रसीदामीतिप्रत्यङ्मुखः प्रस्तोता। उदङ्मुखउद्गातापश्चिमेनोद्गातारंगत्वादक्षिणपूर्वादिशं
ईक्षमाणः प्रतिहर्ता। सव्यपादाधरानुपरष्ठान्कृत्वाद्यावापृथिव्योः संधिमीक्षमाणाः समानिमुखानिधा
रयंतआसीरन्। एवंसर्वस्तोत्रेष्वासनमुद्गातॄणां अध्वर्युणादीयमानंप्रस्तरंप्रस्तोताप्रतिगृह्यब्रह्मन्स्तो
ष्यामः प्रशास्तरित्युक्त्वातमुद्गात्रेप्रयच्छतिउद्गातेनप्रस्तरेणदक्षिणांजंघामुपहत्यस्तोमयोगंकुर्या
त्। अग्नेस्तेजसेंद्रस्येंद्रियेण सूर्यस्यवर्चसा बृहस्पतिस्त्वायुनक्तुदेवेभ्यः प्राणायाग्निर्युनक्तुतपसास्तो २२
मंयज्ञायवोढवेदधातिंद्रइंद्रियंसत्याः कामायजमानस्यसं[illegible]तिनि। अग्नेस्तेजसाबृहस्पतिस्त्वा

युनक्तुदेवेभ्यः प्राणायेत्यादिनावास्तोमयोगः। उद्गाताजपति। अन्नंकरिष्याम्यन्नंभवत्यन्नंजनयि
ष्यामीति चात्वालोदपात्रेवेक्षेरन्। आदित्यमवेक्षेरन्। सामासिप्रतिमाभाहीति तूष्णींवा। बहिष्पवमा
नस्यसर्वासांऋचांगायत्रीछंदः। ऋषिःपुष्कलः। सोमोदेवता। इमेवैलोकाइति गायत्रीविधायकब्रा
ह्मणं। मनोहिंकारइत्युद्गीथोपासकस्य। सतुवैयज्ञेनयजनइत्यारभ्यप्रजापतिर्देवभ्यआत्मानमित्य
तेबहिष्पवमानस्यब्राह्मणं। बहिष्पवमानस्यस्क्तेतोसोमोदेवता। षट्त्रिंशेप्रजापतिरकामयतेत्या
रभ्यरस्यवाएताबहिष्पवमानइत्यंतंधूर्विधायकब्राह्मणं। धुराछंदःसि। प्रथमायारेतस्याछंदः। प्रजा
पतिर्देवता। सर्वंचराचरंवर्गंध्यायन्गायेत्। द्वितीयायागायत्रीछंदः। अग्निर्देवता। पृथिवींध्यान्।
तृतीयायास्त्रिष्टुप्। इंद्रोदेवता। अंतरिक्षंध्यायन्०। चतुर्थ्याजगतीछंदः। सूर्योदेवता। दिवंध्याय
न्। पंचम्याअनुष्टुप्। प्रजापतिर्देवता। सर्वंचराचरवर्गंध्यायन्गायेत्। षष्ठ्याः पंक्तिश्छंदः सोमो
देवता। दिशोध्यायन्। धुरायामपिपुष्कलऋषिः। अन्नमनसीप्राणापानौचक्षुःश्रोत्रेवाक्समा
नोदानोइतिध्येयानि। प्राणःप्रस्तोतुर्देवता। आदित्यउद्गातुः। अन्नंप्रतिहर्तुः। अग्नेरुद्गीथोनि

रुक्तः प्रजापतेर्निरुक्तः। सोमस्यमृदु श्लक्ष्णं वायोः श्लक्ष्णं बलवदिंद्रस्य क्रौंचं बृहस्पतेः। एतासां देव
तानामितिध्यानं। अथामृतत्वं देवेभ्य आगायानि। स्वधां पितृभ्य आ०। आशां मनुष्येभ्य आ०। तृणोद
कं पशुभ्य आ०। स्वर्गं लोकं यजमानायागा०। अन्नमात्मन आ०। इतिध्यानं सर्वेषां। अथ सकृद्धिंकृत्य
बहिष्पवमानेन स्तुवीरन्। इंद्रः स्वरेण प्रातः सवन सर्वेषां स्तोत्राणामेष एव स्वरः। सर्वे हुं इति हिंकुर्वं
ति। हिंकारकाले सर्वेषामुपवेशनं कुर्युरित्येके। अथ बहिष्पवमानस्य प्रस्तावा उच्यंते। उपास्मैगाय
तानराम्। अभितेमधुनापयोम्। सनः सनः पवस्वशंगवोम्। दविद्युततियारुचोम्। हिन्वानोहेतृभि
र्यतोम्। ऋधक्सोमस्वस्तयोम्। पवमानस्यतेकवोम्। अच्छाकोशंमधुश्चुतोम्। अच्छासमुद्रमिंदवो
म्। अथ प्रतिहारा उच्यंते। हुं आ इति हिंकारो वै गायत्रस्य प्रतिहारः। समनसाध्येय इति श्रुतेः। रेत
स्यायाम हिंकारः। अहिंकृता प्रथमा रे तस्येति वचनात्। रेतस्यायामप्रतिहर्ता हिंकारं मनसाध्याये
त्। न परास्विति गोतमः। परास्वेवेति धानंजय्य शांडिल्यौ। सर्वेषु पक्षेषु सर्वत्र प्रथमवर्जं उद्गाता प्रति
हारं वाचा ब्रूयात्। मनसा प्रतिहर्ता। सर्वे निधनं ब्रूयुः। उद्गाता वा। अथ बहिष्पवमानस्यार्चिकगानां

न्युच्यंते। उपास्मैगायतानरोम्। आर्चिके अनिरुक्ते चोंकारेणोद्गीथादानं। सर्वेषां स्तोत्रसाम्नामप्येवं।
ओंकारस्य परमेष्ठी ऋषिः। दैवी गायत्री छंदः। परमात्मा देवता। क्रुष्टप्रथमद्वितीयतृतीयचतुर्थमंद्राति
स्वार्याणां सप्तानां स्वराणां क्रमेण प्रजापतिरादित्याः साध्या अग्निर्वायुः सोमो मित्रावरुणपितृदेवताः।
ओंपा२वा२मानायेंदावा२ अभिदेवा२ं इया१२१२ इतित्रिः कर्षणं। हुं आ। सा३४५त्। अभितेमधुना
पयोम्। ओमाथर्वाणो अशिश्रादे२ सद्म्कं णं। सुवेदेवायदा१२१२ कादारे त्रिः कर्षणं हुं आ२ वायो।
सा३४५म्। अत्र मध्यपादे उत्तमाक्षरस्य उत्तरपादे प्रथमाक्षरस्य च व्यत्यासः। सनपवस्वशंगवोम्। ओंशं
रज्जा२ना२यप्रामर्वा तायिशा२ं राजा१नो२ षाधा१२१२ त्रिः कर्षणं। हुं आ२ सायो। स्रुवा३४५ः। दविद्युतति
यारुचोम्। ओंपारिष्टोभा२न्तोया कृपा२ सोमाः शुक्रा२ गवा१२१२ त्रिः कर्षणं। हुं आ२ शाइरो। इडा३४५
हिन्वानोहेतृभिर्हितोम्। यावाजंवाज्य क्रमी१२१२ मीकारे त्रिः कर्षणं। सीदंतो वा१२१२ त्रिः कर्षणं। नु
षा१२१२ हुं आ२ षायो। वा। ३४५क। ऋधक्सोमस्वस्तयोम्। ओंसंजग्मानोदायिवा कावायि। पव
स्वसूरिया१२१२ त्रिः कर्षणं। हुं आ२ देवो। ओ३४५ पवमानस्यतेकवोम्। ओंवाजिन्त्सर्गा असृक्षता२

अर्वंतो नश्रवो १२१२ ऊंम् आ २ स्यावो। ओ ३ ४५ पा। अछाकोशं मधुश्चुतोम्। ओंमास्रग्रंवोरे अव्याया
२ अवावशंतधो १२१२ तुजस्त्रिः कर्षणं। ऊं आ २ ता यो। ओ ३ ४५ अछासमुद्रमिंदवोम्। ओंमा २ स्तं गा
वोनधेनवा २ अग्मन्तस्ययो १२१२ त्रिः कर्षणं। ऊंम् नाधिमो ओ ३ ४५ सर्वत्र ह्यक्षरं शिष्ट्वा हिंका
रं ब्रूयात्। एवमार्चिकगानं मनसा गायेत्। अनिरुक्तगाने वर्तमाने शेषमुद्गाता मनसा तु स्वभक्ति
मित्यादिवचनात्। अथानिरुक्तगानानि। उपास्मै गायता नरोमिति प्रस्तावः। अत्र ओ इत्युपगा
तारः। ओमिति यजमानः। प्रस्तावांते उद्गाता। ओमोइत्योंकारेण त्रिरा काशे घूर्णनं कृत्वा हिंरित्य
न्ये। तर्जन्यां निपात्य मध्यमांगुल्या मनवरुह्य पुनरपि ओइत्योकारेण प्रदेशिनीमारभ्य त्रिःक
र्षणं कृत्वा ओइत्याकाशे कृत्वा सादिति निधनं ब्रूयात्। सर्वे च निधनं ब्रूयुः। अभितेमधुनापयोम्।
ओमोइति सकृदाकाशे घूर्णनं कृत्वा प्रदेशिन्यां निपात्य पुनरप्योकारेण प्रदेशिनीमारभ्य त्रिः
कर्षणं। ऊं आ २ इति सकृद्घूर्णनमाकाशे ओं सामिति निधनं। स नः पवस्व शं गवोम्। ओमोइत्यो ॥२४॥
कारेण त्रिराकाशे भ्रमणं कृत्वा ऽनवानं भ्रमणवर्जितम् सकृत्कर्षणं कृत्वा पुनश्चौंकारेण प्रदे

शिनीमारभ्य सकृत्कर्षणं सकृद्भ्रमणं षाधा इति धाकारे त्रिः कर्षणं। आकाशे उपक्रमः। ऊंम्। आ इति सकृ
द्घूर्णनं। ॐ स्रुवा इति निधनं। धानंजय मतमाश्रित्य प्रयोगः। षाधा इति धानंजय्य इति वचनात्। दविद्यु
तत्या रुचोम्। ओमोइत्योकारे द्विर्भ्रमणं। प्रथमस्याकाशे द्वितीयस्य प्रदेशिन्यां निपातनं सोमाः शुक्रा
इति सकृद्भ्रमणं। अथोकारेण त्रिः कर्षणं। आकाशमारभ्य ऊं आ इति पूर्ववत्। ओं इडेति समापनं। अत्रा
पि धानंजयमतमाश्रित्य प्रयोगः सोमाः शुक्रा इति धानंजय्य वचनात्। हिन्वानो हेतृभिर्हितोम्। ओमावा
जं वाज्यक्रमीमी कारे त्रिः कारे त्रिः कर्षणं। आकाशे आरंभः। अथ ओइत्योकारे त्रिः कर्षणं। प्रदेशिनीमा
रभ्य अथ नुषा इति षाकारे त्रिः कर्षणं। प्रदेशिनीमारभ्य ऊं आ इति पूर्ववत्। ओं वागिति समाप्तिः। ऋध
क्सोमस्वस्तवोम्। ओमोइत्योकारेण त्रिः कर्षणं। कृत्वा चतुर्थे नोकारेण प्रदेशिन्या उपविष्टा दाकाशे
समाप्तिः। पुनरप्योकारेण त्रिः कर्षणं। ऊं आ इति पूर्ववत्। आ इति समाप्तिः। पवमानस्य ते कवोम्। अ
